International Journal of Sanskrit Research 2023; 9(3): 113-116

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 113-116
© 2023 IJSR
www.anantaajournal.com
Received: 18-03-2023
Accepted: 25-04-2023

**Jyothi H P**
Project Assistant, Karnataka Samskrit University, Bengaluru, Karnataka, India

**Corresponding Author:**
**Jyothi H P**
Project Assistant, Karnataka Samskrit University, Bengaluru, Karnataka, India

# मम्मटकाव्यप्रयोजनलक्षणेकाचिन्नूतनादृष्टिः (भास्करमिश्रस्य साहित्यदीपिकया परिपोषिता)

**Jyothi HP**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i3b.2104

प्रस्तावना

अनन्तशास्त्रं बहुवेदितव्यं स्वल्पश्च कालो बहवश्च विघ्नाः।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमध्यात्॥ [1]

इत्यनया सूक्त्या ज्ञायते यदस्यां जीविकायां किमस्माकं पात्रत्वं, का चास्माकं स्थितिः, किं वास्माभिस्साधितव्यमित्यादि। हंसक्षीरन्यायेन यदुपादेयं, यदनुपादेयमिति परिज्ञानेनैव सामाजिकस्य समाजस्य च स्थितिगतिः सुसम्पन्ना भवति। अतः मानवस्य प्रवृत्तिसन्नियामकत्वेन सत्प्रवृत्तिप्रेरकत्वेन च सर्वाणि शास्त्राणि प्रचलितानि। शास्त्रं किमपि वा भवतु, प्रत्येकस्यापि शास्त्रग्रन्थस्य सामजिकसहकारित्वमेव मूलं प्रयोजनम्।
मया समर्प्यमाणेऽस्मिन्पत्रे काव्यशास्त्रचक्रवर्तिनः मम्मटाचार्यस्य दार्शनिकदृष्टिः विमृश्यते। ननु काव्यं द्विविधं दृश्यं श्राव्यमिति ज्ञातविषय एव। तत्र नाटकप्रकरणादिभेदेन दशविधं दृश्यकाव्यसाहित्यमिति दशरूपककारो धनञ्जयः स्वग्रन्थे सुविस्तरं प्रतिपादयति। तादृशदृश्यकाव्येषु आधुनिक-चलनचित्रपरिश्रमोऽप्यन्यतमः। इदानीन्तनकाले समाजस्य हिताकाङ्क्षया प्रवर्तमानेष्वनेकेषु क्षेत्रेषु चलनचित्रपरिश्रमोऽप्यन्यतमः प्रभावयुक्तश्च। अद्य लोके चलनचित्रं मानवस्य दुष्प्रवृत्तौ, सत्प्रवृत्तौ वा बिम्बप्रतिबिम्बरूपेण कार्यं निर्वहति। प्राचीनकाले जनाः स्वबाल्ययोवनावस्थासु गुरुकुलाधिवासं कुर्वन्ति स्म, यत्र च गुरुमुखादेव कर्तव्याकर्तव्यरूपपरिज्ञानं प्राप्य सन्मार्गमनुसरन्ति स्म। परन्तु आधुनिकेऽस्मिन्यान्त्रिकयुगे नास्ति तादृशी स्थितिः। न गुरवः, न च गुरुकुलाः,न वा औचित्यानौचित्यविवेकः।

[1]वैय्याकरणमहाभाष्यम् - पस्पशाह्निकम्

अत एवंभूते काले सकलविध-लौकिकालौकिकविवेकप्रदाने चलनचित्रक्षेत्रस्य योगदानं महत्तरम्। समस्तदृश्यश्राव्यादिकाव्यानि, तत्सम्बन्धिलक्षणग्रन्थाश्च साहित्यशास्त्रगर्भिता एव। न केवलं एषां अपि तु चलनचित्रक्षेत्रस्यापि साहित्यशास्त्र एव अन्तर्भाव इति वक्तुं शक्यते। यस्य च साहित्यशास्त्रस्य काव्यशास्त्रं, अलङ्कारशास्त्रं, सौन्दर्यशाश्त्रमित्यादयो पर्यायवाचकाः व्यवहारे सन्ति। तादृशसाहित्यस्य च स्थानं, काव्यप्रकाशस्य सङ्केतटीकागतप्रस्तावने अत्यद्भुतं वर्णितास्ति। यथा च –

सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्।
एकमापातमधुरं अन्यदालोचनामृतम्॥[2]

यथा च मातुः स्तनपानात्शिशुः नन्दति। तथैव सकलविद्यामूर्तिभूतायाः सरस्वत्याः पवित्रस्तननिस्सृतं अमृततुल्यं साहित्यपयः संसेव्य रसज्ञो शिशुः ब्रह्मानन्दमवाप्नोतीत्यत्र न काप्यतिशयोक्तिः। श्लोकस्यास्य चलनचित्रपरत्वेन प्रकारान्तरेणापि व्याख्यातुं शक्यते। अत्र सङ्गीतं (Music) अत्यन्तमधुरं, साहित्यं च (Lyrics) आलोचनामृतमिति कविना प्रतिपादितं उभयमपि सरस्वत्याः नाम काचन अतिसुन्दरवनितायाः स्तनद्वयम्। या च शिशूनां मातृत्वेन, युवकानां प्रियात्वेन, पतिजनानां पत्नीत्वेन, शिष्यानां च गुरुत्वेन व्यववहरति। सैव सङ्गीतसाहित्यात्मिका स्त्री चलनचित्ररूपा। यच्च चलनचित्रं मातृवत्पोषयति, प्रियावत्तोषयति, पत्नीवत् सहचरति, गुरुवदुपदिशति च।
तच्च साहित्यस्य गुणं वैशिष्ट्यं चाह -

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ॥[3]

इत्यतः लोकोत्तराह्लादजनकसुमधुरपदसरणित्वं फलितं लक्षणं काव्यस्य। शास्त्रं विधिनिषेधैः उपदिशति अत एव कटुकौषधत्वेन उदाहृतम्। येन शास्त्रेण अविद्यादिव्याधिविनाशः मोक्षादिफलं च भवति, परन्तु तदनुभूतिः कटुसाध्य एव।एवं सति काव्यं कान्तासंहितारूपं यच्चामृततुल्यम्। तादृशकाव्यानां लक्षणनियमादिप्रतिपादनपुरस्सरं निस्सृतं शास्त्रमेव अलङ्कारशास्त्रमिति प्रतीतिः। एवंभूतसाहित्यशास्त्रे भरतभामहवामनमम्मटादिभिर्लक्षणकारैः अलङ्काराः(Rhetoric), ध्वनिरसादयः(Aesthetics), नाट्यलक्षणानि (Dramaturgy)च अतिप्रधानसोपानत्वेन सविस्तरं प्रतिपादिताः।

यानेव शब्दान् वयमालपामः यानेव चार्थान् वयमुल्लिखामः।
तानेव विन्यासविशेषभव्यैः सम्मोहयन्तो कवयो जयन्ति॥[4]

लोकव्यवहारे तावत् आद्ये शब्दाः प्रयुज्यन्ते, ये चार्थास्तैर्निष्पद्यन्ते तानेव कविवरेण्याः स्वविन्यासैः चमत्कारशैल्या मौक्तिकहारवत् सज्जीकृत्य सामाजिकानां रसानन्दावाप्तये प्रददति। मानवीयजीविकायां या प्रवृत्तिः, लोकोपयुक्तवाक्शैली इत्याद्या भवन्ति ता एव चलनचित्रेषु प्रतिबिम्बरूपेण दर्शयितुं चित्रनिर्माणकगणः प्रयतति।
विदितविषय एव यत् सौन्दर्यशास्त्रलक्षणग्रन्थानां मुकुटप्रायो ग्रन्थः काव्यप्रकाश इति, तत्कर्ता च मम्मटाचार्य इति। यो ग्रन्थः न केवलं शास्त्रपरम्परां काव्यपरम्परामुद्दिश्य प्रवर्तते, अपि तु ग्रन्थस्यास्य पदे पदे काचन दार्शनिकी, सामाजिकी च दृष्टिः आन्तरङ्गिकतया प्रकाश्यत एव।मम्मटः स्वकाव्यप्रकाशं दश उल्लासैः विभजति। यत्र दशोल्लासेषु नाट्यलक्षण-दृश्यकाव्यसम्बन्धिविषयान्विहाय समस्तकाव्यशास्त्रीयतत्त्वान् समग्रतया सुस्पष्टतया स्वगम्भीरासन्दिग्धरचनाशैल्या च प्रतिपादयति। येन समस्तसंस्कृतवाङ्मयगतबुधजनप्रीतिः रसिकानां मनोतुष्टिश्च समभूत्। यद्यपि अस्मिन्ग्रन्थे दृश्यकाव्यानां

[2]सङ्केतटीकाभूमिका, प्राच्यविद्यासंशोधनालयः, मैसूरु विश्वविद्या निलयः, १९७४.

[3]वक्रोक्तिजीवितम् १ - ७

[4]शिवलीलार्णवः १ - १३

प्रतिपादनाभावेऽपि सर्वत्रापि दृष्यकाव्यतत्त्वेषु अस्य काव्यप्रकाशस्य लक्षणसामान्यानां समन्वयो भवत्येव। तत्प्रसङ्गे काव्यप्रयोजनप्रतिपादकत्वेन स्थितस्य काव्यं यशसइत्यादिश्लोकमात्रस्य सामाजिकदृष्टिकोनमत्र परामृशते। यथा च मम्मटः काव्यप्रयोजनविवरणप्रसङ्गे एवं निरूपयति।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासंहिततयोपदेशयुजे॥[5] इति

श्लोकोऽयं न केवलं काव्यप्रयोजनानि प्रतिपादयति, अपि तु सामाजिकानां श्रेयस्कामनया यःकश्चिन्निगूढो च विषयोऽत्र सूचित इति सुस्पष्टमनुमीयते। काव्यप्रकाशः ध्वनिसमर्थको ग्रन्थः, अत एव आदौ तदीये प्रयोजनप्रतिपादके पद्येऽपि क्वचिदन्योर्थो ध्वन्यते। तदत्र प्रतिपाद्यते।वस्तुतः समाजहानिकारकाः स्वान्तर्गतवैरिणः षडिति पुराणादीनां सम्मतिः। ते च कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यश्चेति। एवमेव मम्मटप्रतिपादितानि काव्यप्रयोजनान्यपि षडेव। तादृशषड्प्रयोजनप्राप्तिः अरिषड्वर्गस्य निवृत्तावेव संभवसाध्या।

**यथा च -**

कामनिवृत्तौ – यशःप्राप्तिः
क्रोधनिवृत्तौ – अर्थकृत् भवति
लोभनिवृत्तौ – व्यवहारवित् भवति
मोहनिवृत्तौ– शिवेतरक्षतिः
(आद्यात्मिक-आदिदैविक-आदिभौतिकाख्यतापत्रयनिवृत्तिः)
मदनिवृत्तौ– मोक्षप्राप्तिः, रसानन्दावाप्तिः (आन्तरङ्गिकतुष्टिः)
मात्सर्यनिवृत्तौ – मृदुवचनशीलः, सहनशीलश्च भवति (कान्तासंहिततया उपदेशयुक्)

इत्येवंविधेन मम्मटोक्तप्रयोजनानि सामाजिकेन अरिषड्वर्गनिरासेनैव साध्यानीति श्लोकस्यास्य ध्वन्यर्थः। न केवलं ईदृशी सामाजिकी दृष्टिः, अपि तु आदिकाव्ये रामायणे अस्य प्रयोजनभागस्य समन्वयः भवति। श्रीरामस्य कथावस्त्वाधारेण निर्मितस्य समाजहितस्य श्रीरामायणमहाकाव्यस्य फलरूपत्वेन स्थितान्येतनि यशादिष्ट्। तत्र च प्रसङ्गे व्यापारत्वेन इयं अरिषड्वर्गनिवृत्तिः समुल्लसति। एवं काव्यं कारणं, अरिषड्वर्गादिनाशश्चात्र व्यापारः, मम्म्टाचार्योक्तं यशादिषट्कञ्च फलं, प्रयोजनं वेति अनुसन्धानजन्यविषयोऽयं अत्र प्रस्तुतः। अनेन मम्मटाचार्यस्य दार्शनिकदृष्टिश्चात्र प्रकाश्यते।

एतान्येव प्रयोजनानि चलनचित्राणामपि प्रयोजनत्वेन व्यवहरन्ति। चलनचित्रस्य प्रयोजनेषु निर्मापकगणस्य यशःप्राप्तिः, अर्थप्राप्तिः फलम्। पुनरन्यप्रयोजनानि प्रेक्षकोपभोक्तानि भवन्ति। यथा च चलनचित्राधारितसन्देशैः प्रेक्षको व्यवहारविद्भवति, तस्य च हास्यादिसन्निवेशैः दुःखनिवृतौ आह्लादितो भवति। तद्गतानां नवरसानामास्वादनेन रसानन्दमवाप्नोति। न च कदापि चलनचित्रं विदिनिषेधादिभिः शास्त्रवदुपदिशति अपि तु मित्रवत् आवश्यकानुसारं कर्तव्याकर्तव्यत्वविवेकं जनयति। एवं काव्यप्रकाशे विविधांशास्सन्ति, यत्र च प्रतिपदं अनेके दार्शनिकविषयाःगर्भितास्संदृश्यन्ते।

अर्वाचीनचलच्चित्रविमर्शप्रसङ्गे अवश्योल्लेखः विषयोऽयं यत् स्वरूपभेदात् आधुनिकं प्राच्यचलनच्चित्रं पाश्चात्यानुसारीति यद्यपि प्रतीयते, तथाप्यस्य प्राचीनमूलं सुस्पष्टरूपेण भास्वरं विद्यते। नाट्यशास्त्रमेव सर्वविधानां चलनचित्राणां दृश्यकाव्यानां वा स्रोतः, नास्त्यत्र विप्रतिपत्तिः। अभिनयस्य पुङ्खानुपुङ्खविषयाः महर्षिणा भरतेनविशदीकृताः। कालेन नैकानि परिवर्तनानि चलच्चित्रक्षेत्रेऽस्मिन् जातानि। नाट्यशास्त्रञ्च चलच्चित्रनिर्देशकैः विस्मृतम्। किञ्चज्ञानादज्ञानाद्वा अर्वाचीनप्राच्यचलच्चित्रेषु भरतोल्लिखितः मार्गैव अनुश्रितः। एवमेवाग्रे रसप्रतिपादनावसरे नवरसाः प्रतिपादिताः। सामाजिकस्य प्रेक्षकस्य वा रसानुभूतिः कथंभूतेत्यादयोऽपि विषयाः प्रतिपादिताः।

काव्यप्रकाशः न केवलं ध्वनिलक्षणानि प्रतिपादयति अपि तु स्वयमपि तादात्म्येन ध्वनिस्वरूपेण विराजते इत्यत हेतोः ग्रन्थस्यास्य महनीयता विशेषता च।तत्कालीनकाव्यलक्षणग्रन्थेषु

[5]काव्यप्रकाशः 1 - 2

अत्यधिकव्याख्याः काव्यप्रकाशस्यैवोपलभ्यन्ते। विद्यावतां भागवते परीक्षा इति या वरिष्ठोक्तिः सा काव्यप्रकाशविषयेऽपि समन्वेति इति मदभिप्रायः। काव्यशास्त्रप्रवेष्टूणां कृते अयं काव्यप्रकाशः मुखद्वारवत्सहकरोति।काव्यप्रकाशटीकाटिप्पणीनां परम्पराविषये अनेके व्याख्याकाराः स्वव्याख्यासु स्वाभिप्रायान्प्रकटीचक्रुः। यावन्तो हि टीकाग्रन्था ग्रन्थस्यास्य प्रणीता न तावन्तोऽन्यस्य कस्यापि काव्यशास्त्रीयग्रन्थस्य प्रणीताः सन्ति[6]।

ननु प्राचीनकाव्यशास्त्राधारेण चलनचित्रं त्रिधा विभक्तुं शक्यते। यथा च ऐतिह्यं, कल्पितं, मिश्रमिति। ऐतिह्यं तावत् यथावदितिहासगतानां कथाप्रसङ्गानां चलनचित्रे उपस्थापनम्। येन अस्मदितिहास्य परिरक्षणं भवति। कल्पितन्तु निर्देशकेन स्वचिन्तनाधारेण निर्मितं कथावस्तु। मिश्रं तावत् द्वयोस्सम्मेलनं यत्र च भवति। सर्वत्रापि विभेदेषु वीक्षकस्य मनोरञ्जकत्वं तु फलसामान्यम्।

आधुनिके च काले चलनचित्रेषु प्रायः संस्कृतस्य स्वीकरणमसाध्यं स्यात् अपि तु संस्कृतेः स्वीकरणं साध्य एव। संस्कृतिः संस्कृताश्रिता, संस्कृतन्तु संस्कृत्याश्रितं इत्यन्योन्याभावात्।।It may be difficult to adopt Sanskrit language as it is in movies but adopting Samskriti (culture) is ever possible.

यथा रसस्तथा ह्यात्मा यथा ह्यात्मा तथा रसः।
आत्मविद्रसविच्चैव द्वाविमौ सूक्ष्मदर्शिनौ॥[7]

रसपरिणामे आत्मपरिणामः कारणम्, आत्मपरिणामे च रसपरिणामः। अतो यश्च सामाजिकः रसविद्भवति यश्च आत्मविद्भवति तौ द्वौ सूक्ष्मदर्शिनौ इति चास्य तात्पर्यम्। अतस्तादृशरसानुभूतिः काव्यादिभिः, चलनचित्रादिभिरेव संभवतीति सामाजिकाय रसानन्दप्रदाने चलनचित्रमपि महत्तरं स्थानमावहति।

एतादृशनूतनतत्त्वान्वेषणे तेषामवगमने च काव्यप्रकाशस्य प्रकाशिताः, अप्रकाशिताश्च अनेके व्याख्याग्रन्थाः सहकारिभूताः। तेषां परिशीलनावसरे भास्करमिश्रप्रणीता साहित्यदीपिका इति अप्रकाशिता व्याख्यान्तरा शोधपत्रस्यास्य निर्माणे अत्यन्तसहकारित्वेनातिष्ठत्।

एवमेतस्मिन् शोधपत्रे काव्यप्रकाशस्यसामाजिकदृष्टिः, काव्यप्रयोजनानां नूतनं दृष्टिकोनं, आधुनिकजगति चलनचित्रपरिश्रमः, इत्यादयो विषयाः प्रतिपादिताः। काव्यप्रकाशपयोनिधेः बिन्दुमात्रोपस्थापनमत्र कृतम्।यश्च विषयः बुधजनोपादेयार्हो भवतीति विश्वासेन उपसंह्रियते।

अयुक्ता यास्त्विह प्रोक्ताः प्रमादेन भ्रमेण वा।
वाचोमया दयावन्तः सन्तःसंशोधयन्तु ताः॥

## संदर्भ सूची


1. बालबोधिनी काव्यप्रकाशव्याख्या/वामन झलकीकर/BORI, Pune
2. काव्यप्रकाशहृदयप्रकाशः/ डा. एस्. वि रङ्गरामानुजाचार्युलु/2011/RSVP Tirupati.
3. सङ्केतटीकाभूमिका/प्राच्यविद्यासंशोधनालयः/मैसूरु विश्वविद्या निलयः/1974
4. भीनसेनकृत-सुधासागरव्याख्या/सम्पादकः नारायणशास्त्री/1927
5. भास्कमिश्रस्य साहित्यदीपिका काव्यप्रकाशव्याख्या/ अप्रकाशिता


[6] KamalakaraBhatta says that there are a thousand commentaries on the Kavyaprakasa. This is a record which is certainly unequalled by any other work in Sanskrit.

[7]रसोपनिषत् १५ - ५०